## द्वित्रिपूर्वादण् च। (३६/१७०१)

'शाणाद्वा' (५.१.३५/१७००) इत्येव। द्वित्रिपूर्वाच्छाणान्तात् प्रातिपदिकाद् आर्हीयेष्वर्थेषु अण् प्रत्ययो भवति, चकाराद् यच्च वा। तेन त्रैरूप्यं [1]सम्पद्यते। द्वैशाणम्, द्विशाण्यम्, द्विशाणम्। त्रैशाणम्, त्रिशाण्यम्, त्रिशाणम्। 'परिमाणान्तस्यासञ्ज्ञाशाणयोः' (७.३.१७/१६८३) इति पर्युदासादि[2]वृद्धिरेव भवति ॥

## तेन क्रीतम्। (३७/१७०२)

ठञादयस्त्रयोदश प्रत्ययाः प्रकृताः। तेषामितः प्रभृति समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते। तेन इति तृतीयासमर्थात् [3]क्रीतम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सप्तत्या क्रीतम् साप्ततिकम्। आशीतिकम् (५.१.१८/१६८०)। नैष्किकम्। पाणिकम्। [4]पादिकम्। माषिकम् (५.१.२०/१६८२)। शत्यम्। शतिकम् (५.१.२१/१६८६)। द्विकम्। त्रिकम् (५.१.२२/१६८७)। तेन इति मूल्यात् करणे तृतीया [5]समर्थ-विभक्तिः। अन्यत्रानभिधानान् न भवति, देवदत्तेन क्रीतम्, पाणिना क्रीतम् इति। द्विवचनबहुवचनान्तात्[6] प्रत्ययो न भवति, प्रस्थाभ्यां क्रीतम्, प्रस्थैः क्रीतम् इति, अनभिधानादेव। यत्र तु प्रकृत्यर्थस्य सङ्ख्याभेदावगमे प्रमाणमस्ति तत्र द्विवचनबहुवचनान्तादपि प्रत्ययो भवति। द्वाभ्यां [7]क्रीतम् द्विकम्। त्रिकम्। पञ्चकम्। तथा मुद्गैः क्रीतम् मौद्गिकम्। माषिकम्। न ह्येकेन मुद्गेन क्रयः सम्भवति (म.भा. २.३५०) ॥

## तस्य निमित्तं संयोगोत्पातौ। (३८/१७०४)

तस्य इति षष्ठीसमर्थात् निमित्तम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत् तन्निमित्तं संयोगश्चेत् [8]स भवति उत्पातो वा। संयोगः सम्बन्धः प्राणिनां शुभाशुभसूचकः। [9]महाभूतपरिणामः उत्पातः। शतस्य निमित्त [10]धनपतिना संयोगः शत्यः, शतिकः। साहस्रः। उत्पातः खल्वपि - शतस्य निमित्तं उत्पातः दक्षिणाक्षिस्पन्दनम् शत्यम्, शतिकम्। साहस्रम्।

[५११] तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसङ्ख्यानम्। (म.भा. २.३५१)

वातस्य शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्।

[५१२] सन्निपाताच्चेति वक्तव्यम्। (म.भा. २.३५१)

सान्निपातिकम् ॥

## गोद्व्यचोऽसङ्ख्यापरिमाणाश्वादेर्यत्। (३९/१७०६)

गोशब्दाद् द्व्यचश्च प्रातिपदिकात् सङ्ख्यापरिमाणाश्वादिविवर्जितात् यत् प्रत्ययो भवति 'तस्य निमित्तं संयोगोत्पातौ' (५.१.३८/१७०४) इत्येतस्मिन्नर्थे[11]। ठञादीनामपवादः। गोः निमित्तं [12]संयोगः उत्पातो वा

---

1. भवति अ.ड.इ.ग. शाणाद्वा - सम्पद्यते नास्ति ह. 2. °पद° इत्यधिकम् क. 3. प्रतीतम् ह. 4. पादिकं माषिकम् नास्ति ह.ड. 5. विभक्तिः क. 6. च इत्यधिकम् फ.ह. 7. शूर्पाभ्याम् क्रीतं द्विशूर्पम् त्रिशूर्पम् फ. 8. स नास्ति ब.ह. 9. महाभूतानां विपरिणामः ड.फ.ह. 10. दानपतिना क.ड. 11. विषये फ.ह. 12. संयोगोत्पातौ ह.